# WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Supplementary Examination, 2021

## SANACOR01T-SANSKRIT (CC1)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. संस्कृतभाषया देवनागरीलिप्या च यथेच्छं पञ्चप्रश्नानां उत्तरं प्रदेयम्: 2×5 = 10

(क) कौ जगतः पितरौ ? कालिदासेन तौ किमर्थं वन्दितौ आस्ताम् ?

(ख) किं तावत् रघुवंशमहाकाव्यस्य उत्सभूतं महाकाव्यम् ? तस्य महाकाव्यस्य रचयिता कः ?

(ग) "प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः" – किमत्र प्रांशुलभ्यं फलम् ? कश्च वामनः ?

(घ) राज्ञः दिलीपस्य चरित्रस्य गुणत्रयम् उल्लिख्यताम्।

(ङ) कीदृशी आसीत् दिलीपस्य मन्त्रणा ?

(च) "राजेन्दुरिन्दुः क्षीरनिधाविव"– कः अत्र राजेन्दुः ? को वा क्षीरनिधिः ?

(छ) "आसीन्महोक्षितामाद्यः प्रणवश्छन्दसामिव" – कः कथं प्रणवेन सह उपमीयते ?

(ज) रघुवंशस्य नृपाणां गुणत्रयम् उल्लिख्यताम्।

### SECTION-B

2. एकस्य प्रश्नस्य उत्तरं कुरुत। 10×1 = 10

(क) अभीष्टसिद्धये पार्वत्याः साधनमार्गः कीदृशः आसीत् ? कुमारसम्भवमहाकाव्यस्य पञ्चमसर्गानुसारं लिख्यताम्।

(ख) महाकाव्यरूपेण कुमारसम्भवस्य मूल्यायनं क्रियताम्।

3. अधोनिर्दिष्टयोः कस्यचिदेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत। 5×1 = 5

(क) मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः॥

अथवा

(ख) यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम्।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते॥

## SECTION-C

4. एकस्य प्रश्नस्य उत्तरं दीयताम् – 10×1 = 10

(क) पाठ्यपुस्तकमवलम्ब्य वनेचरवचनस्य वर्णनं क्रियताम्।

अथवा

(ख) "भारवेरर्थगौरवम्" – इति सयुक्तिकं विश्लेषणं कुरु।

## SECTION-D

5. संस्कृतेन देवनागरीलिप्या च एकस्य श्लोकस्य व्याख्या क्रियताम्। 5×1 = 5

(क) निरत्ययं साम न दानवर्जितं न भूरिदानं विरहय्य सत्क्रियाम्।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया॥

(ख) क्रियासुयुक्तैर्नृपचारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि श्रन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥

## SECTION-E

6. अधोगतं विषयद्वयम् अवलम्ब्य संस्कृतेन देवनागरीलिप्या च टीका लिख्यताम्। 5×2 = 10

भट्टिकाव्यम्, अश्वघोषः, श्रीहर्षः, जयदेवः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within* 1 *hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——